श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५७

*This document** has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५७

*प्रलम्बासुरवधवर्णनम्*

रामसखः क्वापि दिने कामद भगवन् गतो भवान् विपिनम्।
सूनुभिरपि गोपानां धेनुभिरभि संवृतो लसद्वेषः॥ १॥

सन्दर्शयन् बलाय स्वैरं वृन्दावनश्रियं विमलाम्।
काण्डीरैः सह बालैर्भाण्डीरकमागमो वटं क्रीडन्॥ २॥

तावत्तावकनिधनस्पृहयालुर्गोपमूर्तिरदयालुः।
दैत्यः प्रलम्बनामा प्रलम्बबाहुं भवन्तमापेदे॥ ३॥

जानन्नप्यविजानन्निव तेन समं निबद्धसौहार्दः।
वटनिकटे पटुपशुपव्याबद्धं द्वन्द्वयुद्धमारब्धाः॥ ४॥

गोपान् विभज्य तन्वन् सङ्घं बलभद्रकं भवत्कमपि।
त्वद्बलभीरुं दैत्यं त्वद्बलगतमन्वमन्यथा भगवन्॥ ५॥

कल्पितविजेतृवहने समरे परयूथगं स्वदयिततरम्।
श्रीदामानमधत्थाः पराजितो भक्तदासतां प्रथयन्॥ ६॥

एवं बहुषु विभूमन् बालेषु वहत्सु वाह्यमानेषु।
रामविजितः प्रलम्बो जहार तं दूरतो भवद्भीत्या॥ ७॥

त्वद्दूरं गमयन्तं तं दृष्ट्वा हलिनि विहितगरिमभरे।
दैत्यः स्वरूपमागाद्यद्रूपात् स हि बलोऽपि चकितोऽभूत्॥ ८॥

उच्चतया दैत्यतनोस्त्वन्मुखमालोक्य दूरतो रामः।
विगतभयो दृढमुष्ट्या भृशदुष्टं सपदि पिष्टवानेनम्॥ ९॥

हत्वा दानववीरं प्राप्तं बलमालिलिङ्गिथ प्रेम्णा।
तावन्मिळतोर्युवयोः शिरसि कृता पुष्पवृष्टिरमरगणैः॥ १० ॥

आलम्बो भुवनानां प्रालम्बं निधनमेवमारचयन्।
कालं विहाय सद्यो लोलम्बरुचे हरे हरेः क्लेशान्॥ ११ ॥

**********